# प्रतीच्यसागरतीरे प्राच्यविद्या



उडुपिक्षेत्रे भगवतः श्रीकृष्णस्य दिव्यसन्निधिः अस्ति। क्षेत्रमिदं द्वैतवेदान्तमतप्रतिष्ठापनाचार्याणां श्रीमध्वाचार्याणां जन्मभूमिः। तैरेव श्रीकृष्णस्य पूजाराधनकार्यसम्पादनाय समाजसेवाकार्याय वेदशास्त्राणां प्रचाराय च श्रीकृष्णमठाः परिकल्पिताः।तदग्रे वादिराजयतीन्द्रैः भगवतः श्रीकृष्णस्य पूजाराधनकार्याणां सुचारुरूपेण निर्वहणाय पर्यायपूजाव्यवस्था आरब्धा। एतदर्थम् अष्टौ अपि मठाः निर्दिष्टाः सन्ति। पुत्तिगे- पेजावर- पलिमारु- अदमारु- कृष्णापुर - काणियूरु - शीरूरु- सोदे इति अष्टौ विशिष्टाः मठाः अत्र सन्ति। भारतीयज्ञानपरम्परायाः परिरक्षणे प्रसारे च निमग्नाः मठाधीशाः तेषां शिष्याश्च अत्र नियतं नयनपथमवतरन्ति।









LORD SRI MUKHYAPRANA BHOJANASHALA




एकैकस्यापि मठस्य मठाधीशः स्वस्य स्वस्य पर्याये विधिपूर्वकं भगवतः पूजाकार्याणि समाजसेवां च सश्रद्धं करोति इति विशेषः एव । अधुना (२०२४-२६) पुत्तिगेमठस्य पर्यायः। अतः मठोऽयं पर्यायपुत्तिगेश्रीकृष्णमठः इति व्यपदिश्यते।अस्मिन्पर्याये कोटिगीतालेखनयज्ञकार्यक्रमः इदम्प्रथमतया पुत्तिगेपीठाधीश्वरैः श्रीसुगुणेन्द्रतीर्थैः समारब्धः। तत्करकमलसञ्जाताः श्रीसुश्रीन्द्रतीर्थाः अपि एतस्मिन् कार्ये प्रतिपदं सहयोगं कुर्वन्ति। कोटिगीतालेखनयज्ञे कोटिसंख्याकाः विश्वस्य सामाजिकाः भगवद्गीतां (प्रदत्तपुस्तके) लिखन्ति।

पुनश्च उदयास्तम् आपर्यायं च भक्ताः अखण्डगीतापारायणं गीतामन्दिरे चोपविश्य कुर्वन्ति। एवम् अयं पर्यायः विशिष्टैः कार्यक्रमैः विशिष्टः एव वर्तते।







अस्मिन् पर्याये संस्कृतसंस्कृत्यादिभिः समलङ्कृते च परिवेषे एकपञ्चाशत्तमम् अखिलभारतीयप्राच्यविद्यासम्मेलनं सवैभवं सम्पन्नम् इति अपरः विशेषः। अग्रिमं द्विपञ्चाशत्तमं सम्मेलनं (अभिनवरूपेण हरिद्वारे च ) केन्द्रीयसंस्कृतविश्वविद्यालयस्य माननीयकुलपतीनां श्रीनिवासवरखेडीवर्याणाम् आध्यक्ष्ये भविष्यति। सन्दर्भेऽस्मिन् प्रकाशननिदेशकाः आचार्याः काशीनाथ न्यौपानेवर्याः अवोचन् यत् अस्मिन् वर्षे उडुपिनगरे प्रकाशनपक्षतः पञ्चाशत्संख्याकाः विविधशास्त्रीयग्रन्थाः प्राकाश्यतां नीताः। अग्रिमे चक्रे इतोप्यधिकान् उत्कृष्टग्रन्थान् प्रकाशयिष्यामः इति ते अब्रुवन्।




अतिविशिष्टम् एकपञ्चाशत्तमम् अखिलभारतीयप्राच्यविद्यासम्मेलनम्

पञ्चाशद्वर्षाणां सुदीर्घः इतिहासः अखिलभारतीयप्राच्यविद्यासम्मेलनस्य वर्तते । अस्मिन् वर्षे एकपञ्चाशत्तमं सम्मेलनम् कर्णाटकराज्यस्य उडुपिनगरे दिनत्रयं ( २४-१०-२४ तः २६-१०-२४ पर्यन्तम् ) संस्थात्रयस्य सहयोगेन च सुसम्पन्नम्। वर्षद्वयात् परं पुनरपि हरिद्वारे वरखेडीवर्याणाम् आध्यक्ष्ये पतञ्जलियोगपीठे च भविष्यति।
साम्प्रतं प्रवर्ते सम्मेलने संयोजिका प्रो.कविताहोलेमहोदया अध्यक्षा सरोजाभाटेवर्या स्थानीयसंयोजिका प्रो. शिवानीवर्या चेति तिस्रः नार्यः समेषां सहयोगेन सम्मेलनमिदं समायोज्य समेषां कीर्तिपात्राणि अभूवन्।
भारतीयविद्वत्परिषदः अध्यक्षः कोराडसुब्रह्मण्यवर्यः प्रो. वीरनारायणपाण्डुरङ्गिवर्यः केन्द्रीयसंस्कृतविश्वविद्यालयस्य सर्वेऽपि आचार्याः कर्णाटकसंस्कृतविश्वविद्यालयस्य सर्वेऽपि गुरुशिष्याः च अत्र सहयोगं अकुर्वन्।
उद्घाटनसमारोहोऽपि अद्वितीयः एव आसीत्। पर्याय- पुत्तिगे- श्रीकृष्णमठस्य स्वामिचरणाः श्रीसुगुणेन्द्रतीर्थपादाः बाबारामदेववर्यः आचार्यः बालकृष्णः वरखेडीवर्यः अन्ये मठाधिपतयः AIOC इत्यस्य सर्वे पदाधिकारिणः सदस्याः च सोत्साहं भागमगृह्णन् । सहस्रं शोधपत्राणि नानाराज्येभ्यः समागताः विद्वांसः विदुष्यः शोधच्छात्राः च प्रास्तुवन्। विद्वत्परिषदः अधिवेशने विद्वांसः कल्याणीपरिषदः अधिवेशने च विदुष्यः शास्त्रार्थमकुर्वन्। पुरुषाणाम् अपेक्षया महिलानामेव भागग्रहणं योगदानं च अत्र अधिकम् आसीत् इति विशेषः।



कार्यक्रमाङ्गतया तत् भारतम् इति नृत्यरूपकम् निरुपमाराजेन्द्रगणेन प्रस्तुतम्। उडपिसंस्कृतमहाविद्यालयस्य छात्रैः यक्षगानं सभामुखं प्रदर्शितम्। भोपालस्य श्रीनाट्यम् इति कलासमूहेन षोडशसंस्कारः इति रूपकं प्रदर्शितम्। अष्टावधानकार्यक्रमोऽपि समापनसमारोहे सम्पन्नः। सर्वसंस्कृतविश्वविद्यालयानां कुलपतिसमावेशोऽपि समापनदिवसे संघटितः। All India Oriental Conference इत्यस्य अध्यक्षस्य चयनाय आन्तरिकं निर्वाचनम् अपि अत्र सम्पन्नम् । सर्वसम्मत्या केन्द्रीयसंस्कृतविश्वविद्यालयस्य कुलपतिः श्रीनिवासः वरखेडीवर्यः अग्रिमसम्मेलनस्य अध्यक्षरूपेण चितः।

संस्कृतभारत्याः उपाध्यक्षः दिनेशकामतवर्यः समापनसमारोहे मुख्यातिथिरूपेण भागं गृहीतवान्। संस्कृतभाषायाः प्रचाराय विद्यमानान् मार्गान् महोदयः उपदिष्टवान्।

केन्द्रीयसंस्कृतविश्वविद्यालयेन इदम्प्रथमतया पञ्चाशत्संख्याकानां विविधग्रन्थानां लोकार्पणं कृतम्। मम्मटहृदयम् , अक्षरसमीक्षा, शाब्दबोधविमर्शः, समन्वयः , आस्ट्रेलियाख्यायिका , सहृदयरञ्जिनी , प्राच्यप्रभा भारतीयविद्या च , मीमांसासूत्रसङ्ग्रहः , पञ्चाङ्गपरिचयः इत्यादयः ग्रन्थाः लोकार्पिताः।

दिनत्रयम् द्विसहस्राधिकाः सारस्वताः श्रीकृष्णस्य प्रसादं अन्नब्रह्मणि संसेव्य कृतकृत्याः अभवन्। आवासस्य आयोजनस्य भोजनस्य च दायित्त्वं पुत्तिगेमठस्य सदस्यैः निरूढम्।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य समधिकेन आर्थिकसहयोगेन समेषां सारस्वतानां सहयोगेन च इदम् एकपञ्चाशत्तमम् अखिलभारतीयप्राच्यविद्यासम्मेलनं सुसम्पन्नम्।

आचार्यः गणेशतिम्मण्णपण्डितः
विशिष्टसहयोगः - श्रीरतीशतन्त्री , श्रीपुत्तिगेकृष्णमठः




















https://youtu.be/bbiygLpUujw
https://youtu.be/HkjZs_Au31U?si=8qBqnVUKfAre5IAG

Assist by -Nishika Panwar

# केन्द्रीयसंस्कृतविश्वविद्यालयः

56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी, नवदेहली-110058

# संक्षेपग्रन्थमालालोकार्पणम्




**केन्द्रीयसंस्कृतविश्वविद्यालयस्य प्रकाशनानुभागपक्षतः उडुपीनगरे समायोज्यमाने एकपञ्चाशत्तमे अखिलभारतीयप्राच्यविद्यासम्मेलने सरलसंस्कृतेन विरचितानां सप्तानां संक्षेपग्रन्थानां लोकार्पणम् ।**

@CentralSanskrit www.sanskrit.nic.in 1800 572 4642, 011-28524993

उडुपीनगरे समायोज्यमाने एकपञ्चाशत्तमे अखिलभारतीयप्राच्यविद्यासम्मेलने

# अमृतमहोत्सवग्रन्थमालायाः

## पञ्चदश (15) ग्रन्थानां लोकार्पणम्




## ॥प्रकाशयेम जगत्सर्वम्॥

भारतीयविद्वत्परिषत्
BHARATIYA VIDVAT PARISHAT, BENGALURU

पर्यायश्रीपुत्तिगेमठः
PARYAYA SRI PUTTIGE MATHA, UDUPI

केन्द्रीयसंस्कृतविश्वविद्यालयः
CENTRAL SANSKRIT UNIVERSITY, NEW DELHI

# एकपञ्चाशत्तमे प्राच्यविद्यासम्मेलने ( AIOC) लोकार्पणाय प्रकाशिताः अभिनवग्रन्थाः
































































